धनार्थीत्वं। हिरण्यकदाचिदिहापि कर्मानि। मित्तमेव फलं च दृष्टे न जवीतीन्द्रियकामया

तं तुवदिद्रियैवाद्यप्रजन्यं फलचाद्दृष्टादिवदिति। नापि वक्तव्येन दृष्टमिति हेतोर्विरुद्धत्वात् तोयथैव स्वर्गहेतुः कर्मणः
फलवत्त्वे फलस्यैवाकर्मजन्यत्वे साधयत्येवं दृष्टफलं च मशकाद्दृग्गतस्य फलं चन्नीहाराद्यन्तमफलत्वं वा साधयतीति। त
स्मान्नैवं जातामकेकार्यकारणभावे समवाहेतुदोषप्रसंगादेतत्कुवति नक्विदृष्टादन्यत्रादृष्टस्यापि सिद्धिरिति। यद्येतदनु
मानं तर्हि येव निराकृतं तत्कृपनं हि हि होमान्यायं फलमित्युच्यते। यद्वेति करणे तत एव प्रश्नः कथमुच्यते राष्ट्रेनावगम्यमेत
त्फलमिति भावार्थाधिकरणे पन्यासेनोत्तरं। तस्माद्धोमात्फलमिति न्याय्यं। दध्नः फलमिति वान्याय्यमिति पर्य
सिध्यर्थं सर्वदुच्यते तत्तनुत्यबलवन्निराकरणार्थं। कदाचिद्ध्यमपि न्याय्यं भवेत्। अपि वा दध्नुप्यसमर्थमिति। न ता
52 वत्कर्मानपेक्षस्य दध्नः करणत्वमाहित्येन फलसंबंधो वस्यादत्र जयत्रावि धातव्यं न तच्छक्यमिति। ननु कर्तुबलानि ५२
वेडिनवदिति। प्रासंगिककर्मसंबंधादि प्रायेण वस्तुसामर्थ्यनिराकरणार्थं वा। तथा हि। दध्नुग्यसमर्थमिति यि
था कृतगृहीतेन परवचनेन वस्तुसामर्थ्यमेवोक्तमिति दृश्यते। नञ्चमए कस्या जये प्रयोजनं मिति। न वर्यं नयुक्तः ४
घस्तुसामर्थ्यमपह्नुमहे। किं तर्हि समर्थे पि हि वस्तुन्यविहितानुष्ठानादवश्यं दध्नुत्पयसार्थं च नवि
धातव्यो। नचैतदस्यानेकसंबंधे करणे वाक्यभेदप्रसंगात्संनिकृष्टांसं भवेद्विप्रकृष्टो यो विधीयते। तदिति
दायिहोमसंबंधे संनिकृष्टदधिफलसंबंधस्य विप्रकृष्टस्य युगपद्विधीयमानेयुगपद्वसंभवासंभवाव्यपेतो

स्यात्। तस्मादन्यतरपरित्यागे सति चित्रस्य सिद्धिर्न भवतीति। अनिकर्षवशाद्द्रव्यमपि होमेन संबध्यते। सोऽपि
फलेनेति कर्मयुक्ते सति फलोऽपि इदं कर्मान्तरं तु मिति। — प्रत्युक्ते चानुवाकयोर्गुणेन स्वप्रतीयेत। यादृशोऽपु वाक्ये सुखा
चर्यात् फलं भावनार्थाधिकरणे याविन्तीति तत्र तूक्तमेव कथं। यावद्धि विधियामर्थवादाचर्यादिनयोद्भूतम्। ता
वद्वि[illegible]स्य फलसंबंधः सर्वाचर्यमुपगम्यते। भवेत् फलश्रुतिर्यागगुणपरत्वे विशेषः। भावकृत
विधिप्रपञ्चो तेनात्मैकवाक्यताम्। भावनास्वरूपमेव विधिश्चेत्तादर्थ्येन तत्र तत्र यत्संक्रामति। तद्यथा चर्यसं
क्रान्तस्य फलवत्। भावनामासादयति तदा चर्यमेव करणीकरोत्यन्यस्य कर्तृत्वे तदर्थं भवतीति यथाग्निहोत्रं जु
हुयात् स्वर्गकाम इत्यादिषु नामतो विधिशब्दे प्रत्यासामर्थ्यादविहितमिति तु दधिपदमशक्यनामधेयलक्षणा
यां प्रशस्तादिवत्स्वरूपं विधानं वा सद्गुणापत्तिवाच्यविनियोगतिं विधिश्चेन्मतस्या काङ्क्षितभावरूपानुनादत्यां दधिपद
नुरक्तायां भावनायां फलमुत्पन्नमानेन दधिसाधनकमेवावधार्यते। न होमस्य साधनत्वेन च विधीयमानाना
मर्थानां भावनान्वेसंलयतिन च विधेयो तेरोपादाने सत्पतिज्ञानार्थं विधानमेव कल्पते इत्युक्तो यत्पादद्धा विधा
ह्येपान्तहोमविधानं तथा फलपदप्रत्ययेन होमं दधिविधानं घातादिफलभावनायां तस्मादिद्ध्यः फलमि

ति। कतमोऽत्र शब्दः पुरुषप्रयत्नपूर्वकमिति। द्वावेकत्र पदयोर्विकल्पना। जैधायि चेत्स्यात्। दधि विषयत्वानुपपत्तेराख्या
तप्रत्ययापेक्षत्वेनाश्रितत्वात्प्रयोगस्येत्येवं चार्थप्रयोगाशक्तस्तत एव फलेन भवितव्यमितिमन्वानस्य प्रश्नः। सिद्धा
न्तवादी तु प्रत्ययार्थविधिविधेयान्यथानुवाद इवैवं विधिकेऽपि प्रसङ्गात्। जुहुयादिति नानुश्रुत्या होमसंबन्धमेष इति
परस्य स्यादिति प्रायविवरणं। पुरुषप्रयत्नश्च विधुपेतानावनोच्यते। सत्यां भावार्थाधिकरणन्यायेन श्रुति
बलीयस्त्वादेवमन्यत्राश्रितं हेतुयेनक्रियां पद्मेनाश्रयेरेवाश्रुतिमपबाधेरंस्तरां कर्णात्स्याद्धर्मोऽपि विधा
नतेयोकार्थविधिरन्तरेण भवनेव चपश्चोपलक्षितपदत्यागोऽन्यस्याभवेत्। तो कार्यविधिसंभवे तावद्विधाय
कोबहुतरार्थविधानमुपपद्यते। होमस्यापूर्वफलभावनाकरणत्वाङ्गत्वेयद्दिरूपं होमेनेत्येवमवस्थितस्य कारण
त्वेनैव दध्नासमन्वयासंबन्धेऽनुपपद्यमाने चक्रपम चेर्थलक्षणापरिगृहीतत्वाद्दधिमत्ता होमेनेति। नवतत्वा
द्विधिसमानमाख्यानवद्दधिशब्दस्यायमतिप्रवृत्तिनिमित्तेकर्मनामधेयत्वं घटते। सोऽयमुभयथाप्यदृष्टा ५३
द्धिशब्दोऽनर्थक एव स्यादिति। तत्र कस्य चिच्छब्दधर्मसंनिवेशकत्वानुग्रहेण धर्मविशिष्टः परित्यागाद्वा। स्त

53

नइति। वाक्येतत्तरांश्च तिः। गुणसमभिव्याहारपदेनु न कस्यचिद्बाधस्तत्रेत्तदुच्यते। जुहोतीति शब्दो वाक्यन इति। तत्सहितार्थमा
हावश्यं जुहुयादिति विवक्षितं। कथं न दध्नींद्रियसंबंधो भावनावचनाद्भिन्ना। नन्वास्योच्चारणांशमात्रेण विधानेन विना। अस्त
विधाउ यस्मादवश्यमेव दध्नींद्रियविशिष्टां भावनामुच्चारयितव्यः। तत्र केवलप्रयोगायंशवाद्व्युत्पत्तिरिक्तप्रसक्त्यनुपप
त्तेश्च यत्नाकृतत्वाच्चोदनातो। परत उच्चारयितव्यस्तत्र नश्यत्यत्र कवनधातावुपादातव्यस्तस्माद्धोमप्रकरणप्राप्तहोमोपादानमंगी
कृतं दधिसंबंधोपि वाक्यप्रकरणादेवाश्रयाश्रयिरूपः प्राप्तोनुवदिष्यते। यथा चन विनैव वचनमेवैकं प्रयोजनमिति अ
हादिषु कारकमात्रप्रतिपत्त्यर्थमुच्चार्यमाणोनांतरीयकत्वादविवक्षितामपि संख्यां प्रत्यापयतीति विवक्ष्यते। तथात्र प्रत्य
यानुग्रहार्थं धातुरुच्चार्यमाणः संबंधबलादविवक्षितमपि स्वार्थं प्रत्यापयति। न हि तस्यार्थप्रत्यायनमेवैकं प्रयोज
नमिति वक्तव्यं। ननूक्तमानर्थक्येपीति। प्रत्ययानुग्रहार्थमपि धातुरुच्चार्यमाणः स्वार्थं प्रत्यापयति। न हि तस्यार्थप्रत्यायनमे
वैकं प्रयोजनमिति वक्तव्यं। ननूक्तमानर्थक्येपीति। न चास्य यदेकं चवद्विवक्षाकारणं। किंचिदस्ति तस्माद्यथा जिज
जितकेवलकरोत्यर्थासंभवात्स्वमर्थमेतदिति। नैष दोषः। जलमपि होमसंबंधे करोत्यर्थनिपातादानावमात्रेणैव
प्रयोजनसिद्धेः। यस्य होमसंबंधस्तत्ता विशेषो नास्ति। किंचिद्विधिना द्विप्रकारांतरेण वा भावनां विरोधात्। ननु च वैसातिस
एवदोष इति। अपरित्यज्यमानो होमोबलाकरणी भवतीति मन्यते। सिद्धांतवादी चाह वाक्यांतरात्यस्तोजुहुयादि स्य

तिशाब्दस्यैतत्सामर्थ्यं येन तत्त्वेयं भावना निर्वर्तयति होम एव करणमिति। निपुणतरं पश्यतां यथैव प्रत्यासन्नः साध्यांशमुपा
धावन्न योग्यत्वाद्व्यावर्तते तथा यदधिपदानुरोधेन साधनांशाद्यभावत्र प्रतीयमानं भावना विशेषणमंशांतरे सैव कि
तमेवमिहापि गुणप्रयत्नेनावस्थास्यतोऽयं पौरुषेर हि कोरणहोममप्राप्तो गुणः फलं साधयिष्यतीति। कः पुनरा
याश्रयिसंबन्धो नाम। किं केन कल्पनावव्यतिरिक्तं तत्त्वाद्व्यतिरिक्त इति केचित्तावदाहुः व्यतिरिक्त एवायमिति॥
कल्प्यं यथैवांशत्रयापेक्षा भावनाभ्युपगम्यते तथा गुणविशिष्टार्थं चतुर्थांशोप्यपेक्ष्यते। यत्र यथा चापूर्वकरणिका भावनावि
54 धेनेतत्रांशत्रयेणैव समाप्यते। यत्र तु गुणः करणत्वेन चोद्यते। तत्र करणभूतेन फलमुत्पादयितव्यं नोदासीनेन तत्रा
प्यकेचिद्वालापूर्वमकुर्वतः करणत्वानुपपत्तेः। कं चिद्वापूर्वं साधयतानेन फलं साधयितव्यमिति यच्चापूर्वमपेक्ष्यांतरं ये
ज्ञायते। यश्च धात्वर्थः साध्यः सर्व एव गुणस्य करणत्वोपजननादाश्रय इत्युच्यते। तत्र वाक्येनान्यसंबंधपरेवाक्यतेदप्र ५४
सांगाः स्वयमाश्रयेत्तु मशान्कुर्वति प्रकरणादग्निहोत्रे होमत्रा आश्रयाल्लभ्यते। तथा लब्धस्य प्रत्ययानुग्रहार्थं प्र
वृत्तेनालंनादिवच्चोदनालिंगं न तेन धात्वनुनान्वयते। यदेकस्मादपूर्वं निर्देशत्वादर्थमिति न्यायेन धात्वर्थो नाम प
दार्थानुग्रहार्थोध्यवसीयते। शक्यते वात्र न चतुर्थ्यपेक्षा शीति वक्तुं करणापेक्षैव होप्याप्ययितर्हि राज्ञा

धान्यर्थेन हि स्याशीघ्रतरं निवर्त्तते। गुणस्य तु क्रियाविशेषसंबंधोत्तरकालं करणत्वं निष्पद्यत इति विरतरेण॥
तस्मात् त्रिविधापेक्षास्तेन होमोपजनितकरणत्वे फलवति गुणे व्यवधारिते कथंभावापेक्षायां सत्यामग्निहो
त्रेतिकर्त्तव्यतेव हृदयेऽन्तर्वर्तीत्यादि संस्काराधिकरणविषयः पर्यवसिते ऽधिकरणार्थे प्रसंगादभिधीयते॥
तत्रानया अग्निहोत्रेतिकर्त्तव्यतयेति। केचिदाहुः। अग्निहोत्रमेवेतिकर्त्तव्यतेति। तच्च युक्तं करणव्यतिरिक्तत्वा
दितिकर्त्तव्यतायाः होमस्य च प्रागुक्तेन न्यायेन करणांशाव्यतिरेकाद् अतो ऽग्निप्रणयनादिकयैवाग्निहोत्रेतिकर्त
व्यतयेत्युच्यते। अत एव तद्धितिकथंभावाकांक्षयेतिकर्त्तव्यतासंबंध इत्यभिमानात्। फलसाधनस्य दध्न इति
यस्यैव होमस्य करणत्वादितिकर्त्तव्यतानुग्राह्यत्वं न वत्स्येवेत तत एव कारणाद् दध्नोपीति। अस्याश्चेतिकर्त्तव्यता
याः संनिधानादिति। संस्काराधिकारः विप्रतिषिद्धसमानविधानत्वाभ्युपगमात्पत्नेः। चोदनालिंगरूपातिदे
नरतिदेशन्यायोपन्यासादन्यैर्बद्धचोद्यदितावत्संनिधानात्संबध्यते। किं चोदनालिंगसंयोगेनापचोदना
लिंगभावः प्रमाणे सह स्कान्ध विशिष्ट इति व्यर्थसंनिधानवा वायुक्तिः। अत एव वक्ष्यमाणमाश्रयतयोप
क्लितेन होमेनोपकारप्रदानरूपेणेतिकर्त्तव्यतायाः संनिधानादतिदेशनिमित्तस्य च चोदनालिंगस्य उ

हेत्वर्थस्यदर्शनाद्यस्मादेववाक्यंचोदनालिंगत्वेनतुहेत्वर्थःप्रकरणात्तामेनुवादस्तस्मात्स्योत्पत्तेःफलंप्रतिप्रत्ययोनविधा
यकः।केनप्राप्तस्यानुवादइतिचेदुक्तआहानवाप्तोहोमस्योत्पत्तिवाक्येविधायकेनाप्नोतिकेचिदनाथ्यास्यवचन
स्यार्थंवर्णयंतिनवाक्यद्वयेफलादिद्वियादग्निहोत्रहोमस्यस्वर्गादिफलंनास्तितत्ववाक्येनप्राप्तत्वादितितच्चनाशं वि
ताग्रस्कृतोपन्यासादसंबद्धमितिपूर्वोक्तेनैवन्यायःतस्मान्नकर्मान्तरंकिंतर्हितस्मिन्नेवकर्मणिदध्नःफलंहोमस्या
55 त्रानुग्राहकोपवातेनैवकारणेनदधिशब्दस्याप्रमादपाभकेवलाद्दध्नःफलासिध्यसंगवाकुन्नयतिरस्कारेणसं
बंधादेवफलमुन्नयोऽस्यदधिहोमयोस्तादर्थ्यं।अत्रतुपूर्वोक्तेनैवन्यायेनदधिहोमसंबंधस्ततोवाक्यस्यास्यवैकल्पा ५५
काचानावाद्दधिफलसंबंधेवानिर्दिष्टेहोमसंबंधःप्राकरणिकोनाप्नोतीत्यनेनैववाक्येनदधिहोमसंबंधंतत्वाफ
लंप्रतिविधावाश्रीयमाणेनेकार्थविधानाद्वाक्यभेदःस्यात्।अतोदध्नएवफलमित्येवव्याख्यायुक्तेतित[illegible]व
यमाभ्यामुपसंहरंतितस्माद्दध्नोहोमेनसंबध्यमानात्फलमितितेनाप्यवेतिविकल्पोपदर्शनेदृष्टव्यं।अन्येऽव भात्र
दत्येकएवार्थपदःसोपपत्तिकआदितआरभ्योपदर्शितइतितस्माद्दध्नःफलमतोदधिशब्दस्यविवक्षितत्वा
दितिपाभेष्यवेतिउपमादप्तिखितमिति।शाक्यपरिहारंविदुकर्षं।यद्देवहिदध्नेन्द्रियकामस्यजुहुयादितिसं

बध्यते तद्देवकरणत्वात् दध्नः फलाभिसंबंधस्य करणत्वान्यथानुपपत्तिकारितः क्रियामात्रसंबंधोपगम्यते। शान्ति दध्न
एवं क्रियाकारकयोः संबंध इति करणविभक्त्यंतर्गतत्वात्स्वत्वपरार्थस्य च प्राधान्यात्प्रातिपदिकार्थोपसर्जनः संबंधः
व फलाय विधीयते। तस्मिंश्च विहिते पूर्ववदेव प्रकरणात्क्रियाविशेषो होमो लभ्यते। तत्र तु रूपदेवतासंबंधस्या
पेना क्रियाकारकसंबंधस्य फलसंबंधे हेतुत्वे कोऽसौ क्रियाविशेष इत्यपेक्षायां विशेषणविशेष्यसंबंधं कर्तुं प्र
करणेन होम उपनीयते। तेनाप्यन्ते दधिहोमसंबंधः फलाय विधीयत इति तत्राप्येवेति समभ्यागत एवं समाश्रयपक्षे
त्वार्थ्यबाधप्रसङ्ग इत्युक्ते। अपवादस्यैव संबध्यमानस्य होमेन दध्युपसर्जनः संबंध इत्यदोषः। ननु दध्नेतीन्द्रियका
मस्येति च पदद्वयसंबंधात्यायाद्वा कांक्षिते। कुतः। नैष दोषः। नैव ह्यनेकसंबंधाद्वाक्यभेदः प्रसज्यते। अ
नेकविधिविशिष्टाद्विधेयेन। यदि सोऽत्र न विधेयोऽप्यपि युगपदेकेन पदेन संबध्यते न यतावता वाक्यं भिद्यते
ऽनेकविधौ हि वाक्यभेदः उक्तः। स यात्र नाश्रयेव फलस्याविधेयत्वाद् एव ह्यत्र वचनव्यक्तिः यदिन्द्रियकामस्य
दिति तत्र दध्नेति विधीयते। यो ह्यिन्द्रियमिच्छति स तत्करोतीति इन्द्रियकामपदविनियुक्तस्तत एव पुरुषः प्रवर्तते तीर
भाऽ१ तत्र यत्तदंशयुक्तानां वानां प्रत्ययोऽन्यकरणांशयुक्तां विधेः ... स्पैकापि विधानान्न वाक्यभेदः। तस्माद्दध्य

दस्यार्थद्विवाक्यगुणत्वफलत्वं न्वकर्मान्तरत्वं चेति सिद्धं ॥ यमेषु कर्मसु केषाञ्चित् ॥ इदानीमस्यार्थवादादर्थमुत्तरमधिक
रणमारभ्यते । तत्र विषयं तावद्दर्शयति । त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मव
र्चसकामो यजेतेत्येवमग्निष्टुतं प्रकृत्य वारवन्तीयमग्निष्टोमं कार्यमिति च गुणं विधाय पुनर्विहितं तस्यैव रेवतीषु वारवन्ती
यमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति । तत्रापि सर्वविदेव संदेहः किं गुणविशिष्टो यागः पूर्वस्मादतिरिच्या
56 यते । किं पूर्वस्यैव गुणादिन्द्रियवत्पशवः फलमिति । किं वा प्राप्तस्य कर्मणो नेदमवाधिकरणेन गुणो फलमिति । तथा हि । रेव
तीवारवन्तीयसंबन्धव्याश्रितविधौ । अयं तत्फलमत्रापि यागो नान विधीयते । रेवतीवारवन्तीयसंबन्धं च करिष्यति ।
विनैव प्रत्ययादृत्याच्चाशङ्कः पृथक्कृतिः । यस्तु रेवतीवारवन्तीयसंबन्धोत्पत्तिविधानात्तस्य च पशुफले प्रतिविधाना
त्प्रत्ययावृत्तिलक्षणो वाक्यभेद आशंक्यते । सोपि नाशंकितव्यः स्वयमेव वेदेन तत्फलस्यापात्तत्वाद्रेवतीषु वारव
न्तीयं कृत्वेति हि निष्पादितसंबन्धेय जनेः परेण लिङ्गकेवलं फलसंबन्धः कर्तव्यस्तेन नावृत्तिदोषोत्र विष्यतीति ॥ ५८
तत्राप्याचारनिर्देशाद्रेवतीनां परार्थता ॥ प्राधान्याद्वारवन्तीये फलं प्रति विधीयते । गुणोपादानवशेन वाचयो
दुर्जातरितो विधायकः फलाय गुणं विदधद्यदप्यत्राहात्रो जं । तद्विधत्ते रेवत्यश्च सप्तमीनिर्देशाद्वारवन्तीयश्चोपन

त्वान्नयोगानांतरमनपेक्षितमाणान फलेन संबध्येतेत उणकं तु वारवंतीयं द्वितीया निर्देशादवगतप्राधान्यं कर्मसान्नि

हितानां भावनां प्रति धात्वर्थस्थानीयं प्रतीयमानं प्रयोजनापेक्षं चाकरणत्वं तां प्रतिपद्यते । अथवा नयतिरस्कारेण

नापि संबंधादेव फलमिति विरूपाः एवं वसति विपरीतदोषे प्राप्ते न यज्ञिः प्रत्ततापदविल्लंबचितत् छन्दस्तस्माद्द्वयजिसा

माना विकरणोत्तपरा षष्ठी फलवतागुणेन सह प्रकरणात्प्राप्तमात्रया श्रयिसंबंधं वदतीप्रमाणेनावा

गाश्रयांतरासंबंधान्न निवृत्तिरूपपन्न एव कारकपूर्वेण्येति तेन वचनांतरेण प्राप्तमान्निवेशेन सामर्थ्यं बंधात्

शिष्टं वारवंतीयमित्यादिष्वर्थमिकर्मांतर चान्वितप्राप्तमनूद्यमानेन प्रत्ययमात्रा संयोज्यते । कर्मांतर

पक्षे तु प्रवर्गप्राप्तं वाद्विधानं तत्त्वानवतं ज्ञप्यते । कृतः । एकशक्तिस्वभावे सर्वदेव विनायकल्प अन्यत्वार्थीनि

विसंज्ञानामकार्थविधिदूष्य । ते नम्वावा शब्देन रेवती विधेयमात्र तिज्ञायफलसंबंधमात्रं विधीयत इति

न्यायानुलविचिपक्षः । सर्वथैने नुवाद्यपानुवादेनैव न न्यूनका मदर्शिताजवंतीति न लाण्ण कारण प्रस

क्रमुपवर्तितास्तस्मात्त्व कर्मान्तरमिति भाष्ये विधीयते । प्राश्नपन्नेन गच्छति यो गुणः प्रकृतौ क्रियमाणः तत्सं

बंधानुवादत्वात् तत्र न चोदनागम्यते । इदं तावदाकाममतत्प्रेवरं वतीष्विसादियजिमवनकूपते । सववयाजेय

57

दृगत्राभिप्रायेणेतादृश्य दि॰ उतस्थितस्या प्रसज्ञनशकामकर्मान्तरं च मध्यवसानुमानं यथा दधिहोमस्यैवं यादि इन्द्रियकामवाक्ये श्रुतफ

लसंबंधमात्रे वाक्येन विधीयमानेऽप्रकरणादेवाश्रयाकांक्षायां उक्तो होमसंबंधस्तन्न घटते ज्ञाक्रोति हि दधि सा हो देव

होमं निर्वर्त्तयितुं न तु रेवतीगुणकं वारवंतीयं याग निर्दिष्टः समर्थमिदं द्रव्यदेवतात्मकं चान्यथा हि । देवताद्रव्यकर्तृस्यो नातिरिक्तः न

प दृष्टो भागः साधनमिति दं सामान्यनैवेष साध्यते । तस्मात्स्वरूपदर्शनेन बुद्धावुपस्थाप्यमानोऽपि यागः सामान्यात्मयोग्यत्वादप्रति च४

पद्यमानो न रेवतीवारवंतीयवाक्यशक्यो ऽनुवदितुं । प्राप्तिप्रमाणानाकांक्षत्वात् वारवंतीयसाध्यत्वेनाश्रयत्वप्रतिपत्तिरसंभवो

त्र न तत्र प्रकरणे ऽन्यानि देवताकल्वारस्मिंस्तु तिष्ठो त्राणी । ऽप्याह च । सोत्र साधनत्वेन चं साम्यांयोग्यतया स्थितं । सोत्रं तु प्र

तनं नास्तीत्याश्रयेण प्रतीयते । ऽप्रयोजनपपानेन शक्यते यागः कर्तुं तथा उक्तदोषप्रसंग दिप्सति । यथा वशा क्रोति याग आ

श्रयत्वं प्रतिपत्तुं तथा प्रतिपत्स्यते । तिसर्वा स्व्यात सहकारिभागानुसारेणावगमात् । ऽनानर्थक्यात्तदंगेषु सनेन

स्यायेनांगत्वं तस्यां च द्वारेण प्रत्याश्रयिसंबंधः सेत्स्यतीति । तदनुपपन्नं । उक्तं हेतुत्वात् । न नामांगेषु क्वचित् तयदंगत्वेन बोधि

तं । प्राधान्यावच्छिन्नेन तु तदंगं नोपपद्यते । समन्वारार लिंकविपर्यस्य यूपत्तियजनदर्शारंभि चैतगुणत्वेन बोधमानं साक्षा ५७

त्वात् । तथैव प्राधान्यावच्छिन्नेत्यनुभ्रतं सा नान्तरीयत्वमव सानात् । तदंगपशुपूपांगचेनेव बाध्यते । तथैव वार

काउपेयस्य चैतवात् यथा शक्तो निरपेक्षो रिष्यतीत्यस्मव सानात् । तदंग पशुपूर्वांग चैनं वा...धार्यते । तथैव वार

नवि॰ वंतीयं याग योग च चेन बोधेन तत्स्वरूपं येनेवादगा । विशेषोत्रापि पुनस्त्वपेक्षा । इदं तु नः फलाय विहितं गुणवत्तां क्रिया

माश्रयत्वेनापेक्षमाणं यदियोग्यां नतेन ततो गृह्यात्स्य न लभते ततो वाक्याद्यथान्तरं चैवं प्रतिपद्यते । न चैतदन्यथानर्थकं तत्र वलिक
मन्तिरविधाने सुतरामर्थवत्ता । न त्वप्तं तत्रोदाहृतमागस्तोत्रयोर्नस्तोत्रे साधिते यागः साधित इति शक्यं वक्तुं तत्र यथैव ऋचं त
रेकृतं ऋचं न रोक्रियेत ताहृगेवैतत्स्यात् । वाजपेयाग्रीति तु संबन्धसामान्यमात्रेवाविनीयमानं पारंपर्यादिङ्गेष्य विरुद्धेति वैषम्यं । ययो
यद्यपि स्तोत्रद्वारेण कृतो राश्रयत्वे स्यात् न पापि सर्वस्तोत्रे पु प्रसज्यमानेऽग्निष्टोमसाम्नेत्यनर्थकं स्यात् । न त्वाग्निष्टो साम ५
मसाम्नि वाक्येनैवाश्रयेन व्यमानेनार्थवत्त्वेनेष्टः पुनरपि वाक्येनाग्निष्टोमसंमात्रे संबन्धेऽवगम्यमाने तत्स्यैवेति विशेष्यते ततो
वाक्यजेष्टः । एतत्स्यैवेति स्याहृदसंबन्धेन पेवसर्वतरायस्तोत्रसंबन्धापत्तेरग्निष्टोमसाम्नेति । विशेषणात्सत्य एवकारेणाप्यजेयः । स्तोत्रस
मसंबन्धेयापि जोरथं स्थितमेव । ननु वाग्निमग्निष्टुत्याश्रयत्वेन लब्धे पूर्वविधिनैव प्रत्येकमवाप्यते । वारवन्तीयं द्विकं तु माश्रयध
त्रस्थाने स्थितं साधयेद्दृष्टं न ततोन्य त्रागमिष्यति । ऋतुरपि च तन्नान्यस्तोत्रागामित्वेनापेक्ष्यते । प्रकृतं ऋच अग्निष्टोमसाम
संबन्धि वारवन्तीयाति क्रमकारणं नावायुन ऋचं तरस्तोत्रान्तरसंबन्धाशंकानेतदेवं । यदि वारवन्तीयाग्निष्टोमसा हि
मविधिवाक्ये वारवन्तीवाक्येनापेक्ष्येत तत एव विज्ञायेत । न तु तदपेक्षा । त्रिगुणं दिवाकयानां परस्परसंबन्धाभावादिसु
पै २ कं प्राक्पूर्वसंबन्धविच्छेदेणाध्यांकृतो वारवन्तीयेन संबन्धो न तत्र कल्पितस्थानविषयत्वं प्रतिपद्येत । कर्मागि नत्न
स्य हितस्यैतत्त्र्यर्थाग्निष्टोमसाम्नैव विज्ञातामिदानीं तु कृष्णार्थं तन्त्र्याद्दृष्टावन्न तदेवस्थाने कल्प्यतिसा

मान्यतोऽदृष्टकल्पनायाश्चैवंजातीयकेषु प्रमाणं च मुक्तं। आहवाकूलायविहितं साम स्वतंत्ररूपमात्रतः। विदस्याध्यायमेवैव
मुत्पत्त्यर्थमपेक्षते। यद्विवारवंतीयमग्निष्टुत्येव प्रथममनुत्पन्नं ततो गत्यंतराभावादनुक्रमापितद्विषयं विज्ञायेते पुनः स
माम्नायमात्राधीनोत्पत्तितत्वगृह्य चाकूलायचोद्यते। न वतत्र गीयंतरस्तोत्रांतरे न तत्र कच अग्निष्टोमसाम्नः कश्चिद्विशेष
यद्विवारवंतीयसंस्कारः कश्चिद्विधीयेत ततः कथं विज्ञायेत द्विप्रोक्षणादिष्विव प्रकृतप्रत्ययो न वेत न चेव मन्त्रितमस्मा आग्निष्टोम
साम च सिद्धिः ननु यथा प्रयोजनार्थमपि सदेत क्रतु मध्यायथयत्र रात्रौ तिष्ठुरु पार्थी न विजुमिति प्रासंगिकाङ्क तु सिद्धोऽपू
58 र्वविकृतौ संज्ञानं लक्ष्यते। यथेड्यार्थदृधिपयसी प्रणीताधर्मानित्यमेते। तत्रैव न भवति यत्र गुणं तत्ताधर्मा न वंतिन्वेहा
ग्निष्टोमसाम चैवारवंतीयस्य गुणः। प्रकरणग्रहणाद्धि न तिगुणं च न पिप्पात्तदेव च वाप्यमि द्विवच्छायदि तु क
ग्निष्टोमसाम संबंधो वा नाम्युते। ततस्तद्धर्मान् हाय प्रणीताधर्मवन्नैव कश्चिद्द्वारपिष्यति॥ ५८
न विस्मकारेणाग्निष्टोमसामसंबंधो वा नाम्युते। ततस्त्वद्धर्मा द्वाप्य प्रणीताधर्मवन्नेवकश्चिद्द्वारपिष्यति॥
तस्मान्नेजापिपरिहारः स नवतीत्यपूर्वकर्मविधिनैवेकवाक्यं च मुपपादनीयं। न पासतिहि यद्यपि तावत्सर्वेमप्राप्तं न प्रा
तस्मान्नेजापिपरिहारः स नवती। अपूर्वकर्मविधिनैवैकवाक्यं च मुपपादनीयं। न पासति हि यद्यपि तावत्सर्वेम प्राप्तं न प्रा
प्तिविशिष्टविधाना शक्यो विधातुं किंपुनर्यदानिकायिचाग्निष्टुद्धर्मेष्वत्रातिदिश्यमानेषु बेक्व प्राप्तं। एतच्छुद्
श्रावद्धर्मलक्षणायानुवादो न विष्यति न चानुवादे लक्षणादोषः। प्रस्तूयमानकर्मविवन चेनवाक्य पेप ज्योतिरित्या
दिवन्मुख्यरूपेणैव वक्ष्यति। तद्वारवंतीयं कृत्वायन्तमग्निष्टोमसाम्नेवैवबद्धमातिदेशेन प्राप्नोतीति तद्य

नुवदिष्यते। न चात्राष्टकल्पिते रेवतीवारवंतीयसंबंधविशिष्टयागमात्रविधानानुरोधाद्यं विधिः नन्वग्निष्टोमसाम्नो
रेवतीवारवंतीयसंबंधो यागस्यात्र विधीयत इत्यन्ये विशिष्टविधिर्निर्दोषः स्यात्तदेव तत्र तथा हि। नैकप्रयत्नसाध्यत्वे
क्रियांतरविशेषणे तेन क्रियाविधायानपूर्वकार्यः पुनर्विधिः। यान्येकक्रियाविशेषणानि तत्र वर्तितानि तान्यवि
धीयमानयागविदोऽधिकृतप्रमाणानि विधायकव्यापारं निंदति। क्रियांतरविशेषणे पुनर्विधीयमानेऽयासंबंधोऽद्दि
तयानाक्षिप्यमाणत्वात् विधायकस्याप्रवृत्तिरेवेति वाक्यभेदप्रसंगोऽत्रापि विनिषदोषः। न चात्राष्टार्थमेवेकं रूक्तं न
वनोत्तरा। सापि स्वयोनौ स्वरप्राप्तत्वदर्शनात् विशेषणत्वं। न च क्रतुनापि स्यात् ऋक्सामयोर्हृदयेन कृतो कृतस्थानेन
साम्नेव रेवतीस्थानकल्पना। रेवतीवारवंतीयसंबंधं निष्पाद्योऽत्र स्वावनापि क्रतुऽवस्थितः स्वविशेषणेऽवि
शिष्टः। न चात्राष्टार्थः क्रतुनाग्रहीतोऽनंतरश्च स विशेषणोऽत्र एव क्रतौ। स तु तत्संबंधसामान्यादनुपजीव्यगुण
त्वात् चाद्वाग् पुनर्निक्षिपन्ति। तादृशाविशेषात् स्थानवारवंतीयवशेन रेवतीरथंतरत्यत्र दृश्यताः कल्प्यते। तेन यथा
प्यत्र वाक्ये अग्निष्टोमसाम न विधीयते तथापि क्रतुविशेषणत्वमपि तत्र स्वक्रामतीति दोषः। अतश्च प्र[illegible]ना
गत्वं बंध स्वसहेवारवंतीयस्य नास्ति। पशव। प्रमानाद्युक्रियाद्वैगुण्येन राश्रीयते। क्रियावारवं

तीयगीतेस्मा क्रिययार्थि प्रयोजनेदाधिगतो दोहनादौ । निःक्रियया विना करणं चमसजनमानानितामपेक्षितेनवारवंतीपि पुन
र्यपतिथानुवाद्या क्रियात्मकत्वाद्विनैव क्रियांतरेण यागवत्फलसाधनमित्यनपेक्ष्यवाधागेना संबध्यमानस्वतंत्रमेव रेवतीषु गी
यमानमग्निष्टुत्प्रयोगाद्बहिः स्वफले भावयेन्नतत्श्रुतस्यैवेति वाग्निष्टोमसामेति वचनचाराद्दृष्टयजेतेति वसर्वमसंबद्धं स्या
त्प्रधानयागात्फलं स्वयं स्वर्थविजातीयेन विशेषणविशिष्टं चान्यमंतिरं समर्थित्वयोगपत्त्वाधानगुणयोराश्रयाश्रयित्वसं
बंधानपेक्षित्वान्निप्रायः । क्रियात्मकत्वाद्या क्रियांतरानपेक्षत्वमुच्यते । तन्नवाकोधिति प्रचक्ष्यपि गुणफलसंबं
59 धस्य यागांतरे विधानस्य चापत्तिरश्वात्वस्य फलं देणा तोवाकसनेदे श्रवक्रतुसंबंधेन भवत्येव विधि विदे वचावाक्य प्रकर
तरस्यैकवंचेचदेतत्ते दइत्यभिप्रायः । नहेतस्य रेवत्यः संतीत्यानं तर्यादिपिवचनव्यक्तिप्रतिमात्येतस्य यारेवत्यस्तासु वा
रवंतीयं कुर्यादिति तत्र यद्यपि प्रकरणात्तस्य चादेतस्येति विशिष्टानुवादेन वाक्यं तिर्नात्ततपापि रेवतीस्वकृपक
र्त्रित्यतेव तावदनप्राप्नोतिनान्यते । तत्र रेवत्यः कर्त्तव्या स्तासु च वारवंतीयमित्ये कोवाक्यभेदः । एतद्धष्टं वेय ५८
र्पदिवा अपचेतच्छष्टानुग्रहार्थमेतस्य रेवत्यः कर्त्तव्या स्तासु च वारवंतीयेतत्वफलायेति विधीयतेयजिश्वा
५८ नृपतनशतितत्पाप्यन्यनिमित्तवाक्याद्वेदाभ्युपगमेनाग्निष्टोमसामसंबंधो विधानुमनुवदितुं वाशक्या वादु
नयपापिनावकल्प्येत । अपसोपि विधीयते ।। तपास तिपूर्वस्मादपि वापगमादग्निष्टोमसाममात्रप्रसंगा

इतस्यैवेत्यनर्थकं विधीयमाने वा क्वा त्वेदं इत्यकांक्षयोजना। अपवादापवादत्वमावश्यकं तत एवेत च्छब्दो रेवतीविशे
५२ षणं तथा च तत एवानुपगम्यते। न तत्रैवं वचनं युज्यते। एतस्य यारेवत्यसु वारवंतीयमग्निष्टोमसाम कुर्याच्चेति तत्र ५२
कस्य क्रतोरित्य विशेषणादितश्च्छब्दस्य रेवतीविशेषणत्वे नोपपद्यते चादितस्याग्निष्टोमसामेति निर्देश
ता तद्विवक्षायां वा पुनरपि वाक्यभेद इहैव सर्वाः पूर्वपक्षवचनयुक्तो निराकृतः। सिद्धांतरूपमवाक्यभेद इ
ति प्रत्यक्षपूर्वपक्षवादि विस्मृतः प्रच्छतीति तथा नाम सुप्रति विहितत्वस्य नैराकांक्ष्ये वाक्यभेदाशंक
जालवदेव दर्शिता प्रत्युक्ता मिता वदेतस्य कथमवाक्यभेद इति। सिद्धांतवादी तु प्राप्तकर्मोद्देशेन विशिष्टवि
धानोपपन्नो सत्यामकार्यं चादित्याहान न्वर्थभेद इति। तत्रांतरख्यातोपात्तभावनाद्यैकवाक्यत्वासंभवाद्विशि
ष्टानेतिक्रमध्यति। गुणत्वे तक्त भावना विशिष्टप्रधानभावनान्तरविधाना विशिष्टयो रेवतीनां वारवंतीय
स्य च संबंधान विहितः स्यादिति। विशेषण विशेष्यणानामेव विधेयत्वात् कृद्गतावन्न विधीयते। तेषां
श्रुत्क्लनैव विधेयमर्यतीति तेन यद्यपि सर्वत्र भावना विधीयते तथापि विध्यधीनप्रवृत्तिश्चात्पुरुषः स
तीमपि नाम सतीमिव प्रतिपद्यते तेन यागभावनामात्रविशेषणत्वाद्रेवतीवारवंतीययोरसद्ब

हिर्णवमात्रेणैव प्रयोक्तृपयोरन्योन्यनियमप्रमाणाभावादेकस्तोत्रविषयचेतदेकदेशनियममेवासति रेवतीष्व
न्यानपि गायत्रामहीयवादीनि सामानि प्राप्नुवंति सामापि वारवंतीयमन्यास्वाचावाप्नुतामुगायत्रीषु हस्तनुष्टु
प्सु प्राप्नोति तत्र रेवतीषु वारवंतीयमिति संबंधप्रतीतिर्व्यर्थस्यादतो वारवंतीयमेवयथावस्तुतस्थानमुद्दिश्य
रेवत्सु विहिता इति नैष दोषः। विधिचैयघपिस्कृत्यानस्वेचेतिब्रवीत्ययोतथाप्यवं विधेतस्यविधिचेज्जुज
मिष्यतां सर्वत्रैवप्रग्रदं स्वचौद्देक्रुयादिति श्रूयते तत्र यदि तावक्कोतद्यानुवाक्याक्रियान्यतरप्राप्ताततो नि
नर मित्ता धर्मप्रवर्णो तवस्य पञ्चप्राप्तानतउत्तरस्याःकरणं पूर्वनिर्दिष्ट सुतरकालत्वेन हितं तामननुष्ठायतथा कर्त्तुं
न शक्यतइत्यपि दवशकर्तुमासनीविहितावहितास्यते नवेद्रेवतीवारवंतीयसंबंधः प्राग्विधः क्रुतश्चि
60 त्प्रामाण्येन निमित्ततयाश्रीयते तस्मादनुष्ठेयत्वविज्ञायते यदि तदनुष्ठेयत्वेन संबंधउपपन्नः कथं ९०
पुनस्तेयानुष्ठेयत्वोपपादयेवस्तुसैवध्यते। तदप्यमाह। यावतावयोक्तिचेतसपराधः शक्नोति वदितु
मिति। कथमेकेनानेकार्थाविगतिरिति वेदत्नआह। दृष्टार्थविधियमपि। पश्वाद्योणामानयेतिप्रमा
णांतरप्राप्तस्यानयनेरकोग्रहश्चोपमानेनरकाम्यश्राद्धस्यामिवाविहितो वाक्यभेदःजनयतितपाव
चाशब्दास्यात्रानिर्दिष्टिः पूर्वकालचचेति-अपवा। तत्रैवनाविधीयते न विशेषणविशेषणोय गतं पर्यागमनं

तत्रकर्माङ्गत्वं ज्ञतायेते। तथैकचमसपक्षाङ्गत्वं तत्र चमसस्य गुणत्वं तत्र चादिति द्रव्यविशेषणानां विधास्य स्यादिव स्यते रिवती
वारवंतीयसंबंधस्य कुर्वीत विशेषणं सामान्यत्वं तत्र चाद्यकुर्वीतस्य स्य इदं हि तेनानुवादत्वं प्रतिपद्यते तेन रथन्तरम्
इह विधिसाविशेषणमिति विधा इति भावना विशेषणत्वस्य कसोत्यपर्यस्यावश्यं रैवतीवारवंतीयस्य संबंधविधिरिति ता
सुपगं तथा। नयाव क्रियाविशेषणानाम पि प्रयाजादीनां विशेषणानि द्रव्यदेवतादीनि दर्श्यते मासा
दिश्यपयोक्तं ते। तस्मान्निष्पन्नसंबंधविशेषिताया भावनाया एकसाम्ये नियमः स्यादिति तच्चाशाद्य्या
त्प्रतिपत्तिक्रमनियमनिर्वृत्तिप्रयत्नवक्तव्यो नानुष्ठाननिर्वृत्त्यर्थं। अग्निष्टोमसाम्नः प्राग्याग एव प्रयोगात्।
अतो नैवं विज्ञायते रैवतीषु वारवंतीयं प्रयुक्तव्यमिति किं तर्हि एवं करिष्यामीति परिकल्प्य यागः प्रक्रमि
तव्य इति। नन्वेवमपीति। यावदिति वेयं विधिकल्पनादनेकार्थं चानेकवाक्यं चेति मन्यते नैष दोष इति
नतावदति विधेयनानात्वेनानेकार्थं चेत्तत्वतीत्युक्तं। अथ प्रयोजनत्वं तु विधेयनानात्वमेवमन्यथा। तत्रोच्यते
अपने बहवो ऽर्थाः एकविधीयते। विशिष्टा भावना सा च यागः इत्युपपन्नैता। ननु रैवत्यामपि विधीयते तेन
तीयदिति मानानुपादेयानेकार्थं तत्र रथन्तरं परिहारः स्यादेते तु सर्वे विधीयमानं चाप्रयोजनत्वं

ताः। तस्मादने कार्थ्यमस्यैवेति। उच्यते। विधेयमात्रमप्यत्रनार्थ इत्यपि निर्धार्यते। प्रधानविधियुक्तार्थः सर्वैकोऽत्र विधीयते। ६२
तदाह। न पुत्रानेकस्य प्रयोजनत्वेनापि प्रेतस्यानेकं पदं विधायकमिति। तथाप्यवान्तरकर्म्मणां तत्क्रियाणां न प्राप्यजि
भावनातः पर्य्यवसानविशिष्टविधुन्नरकाले तु न किं विदेस्यते। तस्मात्सिद्धमेकार्थ्यचोदकवाक्यत्वं। गुणविधित्वे चो
वाक्यभेदः। उच्यते। तेनैतछब्दसमर्थनार्थं सिद्धे पि कर्मान्तरत्वे कर्मगुणफलपक्षात्फलान्तरमिति निराक्रियते। त
त्रैतावचनव्यक्तिः रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति। किमेवं न विध्यति। प्रकरणं नाव
गतबाधिष्यते। एतस्यैवेति च प्रकृतयाहि समीपक्षितसंबाधिपदमनुग्रहीष्यते। तत्रोच्यते। न। पशुकामपदानर्थक्यप्रसंग
61 त्। अतरपरित्यागे वाक्यभेदात्। न ह्येकस्य यागस्य क्रतुफलं प्रति युगपद्विधानमवकल्पते। अपि चैवमुच्यते। रेवतीषु कृतेने गुणकामेषु
ति। अथ मोपन्यस्तमेव पदं दोषान्तरानिषिद्धस्यापुनरुपन्यस्यनातिकेचित्। प्रधानेन वं। कथं तर्हि त्वां शिकानांद्व
यीप्रतिरेकेणामीमांस्यवेदेवगुणात्फलमपरेषां गुणः। कोऽचर्ष एवतद्दृतक्रतोः फलान्तरसंबंधः। तत्रैषा वचनव्य ६९
क्तिः। लिंगं तातवत्स्नेन ब्रह्मवर्चसकामो यजेत यदि तु पशुकामः स्यात्तदा तेनैव रेवत्यादिविशिष्टेनेति। तथा सति सप्र
त्ययः सन्निकृष्टार्थविधिना वक्तृ... तिनवान्यपरत्वसन्निविधानाद्विशिष्टतायागे फले विदधत्सत्ययोनवि
प्रसज्यते। न वान्यपरः। अनुलत्तिमपि... पिष्यमनेकार्थविधानं दयप्रैकोस्मत्रोविवोकर्ना। विधानानिमित्तै

न स्यात् तथा फलविधावपि कर्मोद्देशेन कर्मविधानादिति चेन्न समानो वत्सत्वपदस्ववतीसूक्तं तेन वारवन्तीयेन पशुकामो यजेतेति सोमयागे
रेणयागसाधनत्वोपपत्तेः फलान्तरीयेण ऽपि पवैच्छेत तत्त्वमाणे तैनैवेच्छेद् तेन पशुकामो यजेतेति । तत्रोक्तं । नैवं शाकल्यमगन्तरस्य
गानाद्युद्देशेन गानादिगुणविधानमिति । यदिहितं स्वकर्मान्तरत्वं स्याद् वायव्यास्वग्निष्टोमसाम विहितं तद्गतं रेवत्याख्यागायमानं स्वरूपं
विहितं वायव्याख्यविशेषणगानादिगुणं नैव तान्न चेदानीमवात्मीयेपदे तेनैवैतद्रेवतीषूक्तं स्यात् पि सामानि प्राप्नुवन्ति
स्ववयपर्यनुयुक्ते नान्तरहितानिषेधः । नैवेति हि निर्दिष्टः सैवं धायो यागाय प्रयुक्त तेद्धावनाव पन्निचेत्यशङ्क्य शाकोलिवदिति
मिति । सिद्धान्तवादी च पूर्वकर्मविधावनेकार्थविधानेशकोनामपत्ते तिम समानस्याह । सति वचनेन मलेच्छाकोसवलस्य
चपानिवसनवारवन्तीयग्रहणमात्रेणाज समान विधाना सुरेवतीश कामिति । परः पुनराह वचनेनाहि न विप्रतीति
तेनैवानि प्रायेणाक्तुविशिष्टकर्मविधानात्रेत्याराहस्य वाविधायकत्वाच्छ्रुतिरनुवादस्तिसत्सपिष्टमेव प्रतिविधा
नुत्पन्नविधानान्निधायेत । सिद्धान्तवादी त्वानिष्टवानेकार्थविधानपथानुपपत्तिः फलकथ्यते । यदि वचनात् सिद्ध
कर्मान्तरं वानस्वर्यवाग्निष्टुतो गुणविधानमिति । ननु तन्नो यजेतेति यागानुवादादिति । वचनेनानिराकृतत्वादपापिस्य
पदमेव बलीयो भेदमन्यतेऽनेवंशकामिति । सिद्धान्तविचारणा । यदि हि रेवतीगुणकं वारवन्तीयं यागं प्रतिगुणत्वेमयि
धीयते । ततो वत्स्येदमुद्देश्यस्तनयोद्देश्यमानत्वादेव फलपदेन तेन गुणेन सैव बद्ध्यते संबध्यमानवाक्यत्रिधा

गुणविशिष्टकर्मविधाने वा प्रसक्ता क्रियमाणे न चादेकान्ते न कर्मान्तरं । न च यत्पशुकामो यजेतेत्यप्राप्तत्वादनुवादः संभवति तेन रेवतीवा
रवन्तीयविधिं प्रत्यस्यानिमित्तत्वं प्रत्युक्तं । एतस्य रेवत्सु वारवन्तीयं कृत्वा विकृतवस्य माणानरेणरेवतीभिः संबद्धमिति विशेषणानाद्धि गुणं प्र
वेत्त । अप्रयोगमेवं वानुवाद इति गुणोद्देशेन फलेषु सतिप्रकरणोत्कर्षात् तं यागांगत्वमास्थितात्क्वानुवादिष्यत इति । कः पुनरत्रप्रयोजनोत्पत्ति सं
बंधात् सर्वनिराकृतो दृष्टविशेषो येनोपपद्यते । न युज्यते तत्रत्यानर्थकात्तत्संयोगो द्विसेत्वान्निराकृतो । अग्न्यहानेनुत्तमं न वा इन्
ष्टोमसाम्नः संबंधस्तु फलत्वमिति प्रायः । नो निराकरोति । प्रकरणाद्धि वाक्यं बलवत्तरमिति । अत्र यागश्चापि यत्र वेदो हि फलसंबंधा
नुगुणो वास्तं भवतम् । सेतो सतु न संभवति । यत्र न भंगोऽपि सैव धस्के ऽनुकर्षभावत्र गुणोत्पत्ता तत्र यद्वा तत्र पशुसंयुक्तकरणा
दिति हि वस्तुनि । पशुयुक्तेव देहत्वेन स्यादविरोधात् गुणफलविशिष्टं कर्मान्तरविधानं तत्रैतस्या । सत्यपि कर्मान्तरत्वे तदनुग्रही
ता गुणादेवफलमिति । तद्धि कल्प्यमानावापीधिकरणमाद्येन प्रत्यय सन्निकर्षेण यागफलसंबंधावगमान्निराकरोतीति तस्मा
त्कर्मविधिः । अथ पुनर्यागे गुणविशिष्टे विधीयमाने कथं त्रिवृत्तरस्याग्निष्टोमसाम्नो विशेषणेन संबंध इति । तत्रोत्त ६२
रं वचनादिति । आयुक्तेन न्यायेन आतिदेशिकेन वचनेन हविरग्निष्टोमसाम्नः कार्यमिति न किंचिद्विरुद्धम् । अग्निष्टोमाख्य
सामाथ विहितं विधीयते । यस्य वारवन्तीयं कार्यमिति कल्प्यते । तेन प्राकृतं यज्ञायज्ञीयं कार्यमपि तत्प्रत्यावर्तते । के
अप्यवाग्निष्टोमसाम्न इति स्तोत्रं त्यज्यैव कार्यते । इदं दर्शनवर्जितप्रयुक्तप्रदर्शितस्य समवेतकर्मयुक्तं फलमिति
किश्च

म्नो नरे कुपुरुष कृतेर्निधने कामसंयोगः ज्योतिष्टोमेको नरस्तु कानां अग्ने साम विहितं पुनस्तत देव यदि
रथंतरसामा यदि स्यात् अग्निष्टोमे त्रिवृतानि मित्रायोर्विहितं ततः पुनर्यदीष्टिकामाय अन्नाद्यकामाय स्वर्गकामः
स्योनेरेणस्त्रावीतेति नित्यस्यैवसतः फलत्रय पंचके वं तस्मा पावन स्तवं जातीयके पुकामस्तु सनिस्य
स्य समवादिति कुतुपुरुषार्थैवं जातीयकं भवतीति वक्ष्यत्यकस्मात् नेयच्च संयोगपृथक्त्वमित्यतदपि वक्ष्य
तियथा विकल्पेनैतान्यपस्य फलानि भवंती योगसिद्धिर्वापि स्यात्स्यायोगत्वादितितदेवं योऽनरं प्रेतस्य
नः कृयतेलीपिति इष्टिकामाय निधनं कुर्यादिग्निस्वं ताघकानाय अग्नीति स्वर्गकामायेति निधनमिति वा त्या साम न
क्रिये विधीयते नीतत्रेतद्विचार्यते किं सोऽनरं निरपेक्षं फलानि साधयति इमानि दृष्यादीनि तानि धनानि फला
निपृथगेवनवेत्युत सोऽनरं स्यैव तत्फलं साधयतत्सान्निध्यमपतइति। यद्यपि चात्र कर्मान्तरानेदेसेन तथापि
नियोगादुपन्न स्यतोऽपर्यायाकर्मभेदकत्वजातंभेदा तेषां वपि लब्धौ एवेति संदेहः। एवं चानुष्ठानेपि विशेषो
नवतियदाहृष्टिकामेन सोनरे प्रस्तोतं तदेतरयोरपि निधनयोः स्वफलप्रार्थनावशेन प्रयोगः। प्रथम
इष्टि प्रार्थनयोरपि तेर कर्तव्यायदिनिधनादपरं फलं अपठनिधननियमस्तेतोहीषव प्रयोकाप्ये

केवलं हि प्रार्थयितव्या। एवमन्नाद्यकामस्वर्गकामयोरपि दर्शयितव्यौ। अतः पुनः संशयः केचिन्नाव ज्ञाप्यका
मलौ तेनैव वचनव्यक्तिद्वयप्रविभागेन वर्णयन्ति। ६। आदिशब्दानां वृष्टिकामादिपदैः संबंधो ऽथ निधनपदे वेति।
पयपिण्डात्तरयोर्निधनमिति निश्रूयते तथा श्राद्धकाण्डावशेनानुषज्यमानं सर्वैरपि संबध्यते। नेन वाच्यते। किं ताव
त्। पुनर्विधानसामर्थ्यात्स्वार्थेनाव कल्प्यते। फलं नयस्तनान्नाद्यं। ७। आदेरपर्यफलो यदि हि सोरक्त
फलान्येवैतान्यत्र विधेयं स्यात् ततः पुनर्वचनमनर्थकमापद्यते। नहि तस्य किंचिदपि विधेयं तदा तस्यैतानि
षाहीनां स्यात्स्वांतरेषु सौरनिधनत्वेनपाठबह्वेवमाम्नायात्। नियमार्थश्रुतिरिति चेत्। न श्रुतिप्र
ष्ठानां नियमेन निवर्त्तयितुमशक्यत्वात्सर्वएवतावान्नियमोऽन्यवावृत्तिफलत्वादन्यायस्त्वयापि त
यत्रापि क्लिप्तावस्था निवस्त्वंतराणि भवंति तत्रैकस्यैव वशेन इतराणि निवर्त्तन्ते नाचिरहहीषादीनाम पि
योगेप्येनोक्तविधानादितरनिवृत्तिर्गम्यते तस्मान्नरश्रुत्याहितानि प्राप्यंते। तत्र न शक्यो विधिमात्रप्रवृत्त्या पुनस्त्र ६३
त्यागत्वं तरस्य संभवति बाधनं कर्तुमस्मत्पक्षे तु काम्यस्य पाठादन्यतरद्वलवत्त्वचर्यपाठेतरबाधेन वर्त्तिष्यते
वाक्यांतरविहितं वृष्टिशिषादि संबंधं विदधत्सकामर्थवज्ञाविष्यति। वृष्टिकामशब्दस्य स्वार्थत्वेन संभवन्

वचने निधनवचनस्यावस्थानं ये सोऽन्तरविशेषणार्थःकल्पितो न विरुध्यति। पुरुषार्थत्वं च यस्यैवं विधात्मके वचनेऽस्तु यस्य प्रवर्तनं यो
कुर्यादिष्यते। तस्मान्निधनादपरं फलमिति। सर्वस्य योऽन्यकामस्त्वात्तस्मिन् कामश्रुतिस्यान्निधनार्थं पुनःश्रुतिः
न युज्यते। निधनश्रुतिर्वैयर्थ्यान्निर्हायाः फलसङ्गतिः। निधनेन तु संबंधे फलमिष्टं विशेषणं। हीनादृष्टिं कुर्यान्नावनिधन
न तेनेति वाक्यभेदस्तदसंबंधे यानर्थक्यमिदमत एव तु न किंचिदनर्थकं सर्वस्य सोऽन्तरस्य प्रवचनीतरेऽस्य फलं दृष्टत्वादि
कामत्वेन तत्प्रदानीयप्राप्तत्वाद्धीनादि संबंधमात्रे विधीयमाने वाक्यभेदाभावो न वचनमनर्थकं नियत विशेष नियमार्थ
त्वात्। विनापि वगुण कामत्वेनास्यैव तत्सामान्यविशेषलक्षणो बाधः सोऽन्तरस्य श्रुतस्य सर्वशाखित्वात्मा नावच
नत्वात्। सोऽन्तरश्रुतस्याहि परोक्षत्वस्य निधनान्तरं प्राप्नोतीदं पुनःप्रत्यक्षं तस्माद् बलीयो यथावाधदाहिप्रमा
णांश्रोतेन निवर्त्यते तथापरोक्षत्वापीति। अथवा सोऽन्तरवाक्यार्थोऽतीतेन विकिंचिद्बाध्यते। प्रत्यक्षविधानेनादृष्टान्तरमात्रबावना
तायदि दृष्टीत्वन्तरावयवो विधीयेत ततः सोऽन्तरावयवोऽपि बाध्येत तस्मान्नान्तरमात्रस्य बाधस्य यंति यत विषयइत्यदोषः। तस्मात् कि
धननियमार्थी पुनःश्रुतिर्विशेषिकस्यान्यायमानेनैव किंचिद्बाध्यते तदुच्यते। नतावत्सांशयिकत्वमुक्तो वचनव्यक्तिभेदतः। हीना
निधनसंबंधो न दृष्टोऽदृष्ट्यवधानतः। हीषितिनि यनमितिव्यवहितकल्पनादोषप्रादान्निरुक्तः संबंधस्तपोन्तरपक्षोऽपि। नि
धने हीषिति धानेन दृष्टिकामविशेषितं। विशिष्टार्थत्वनुवादत्वाद्वाक्यभेदः स्फुटो भवेत्। निधनानुवादेन हीषादि

विधानेफलपदमनर्थकं पुनःश्रुतिवैयर्थ्यं च स्यात् तस्मोऽतरस्य हलेनैव हि निधनमात्रसंबंधः प्राप्त इति न तन्मात्रवचनेनार्थ
स्तत्र यदि दृष्टिकामाय यज्ञो नरं तस्य यान्निधनामिति विशिष्टमनूद्य तत्र हाब्द प्रयुंजीतेति विधीयते ततोऽनेकस्य
बंधकस्तत्रो ह्याक्येन्नियेता यय पिवृष्टिकामस्यौनरानि धनानि प्राप्तानि तथाप्यन्यकामपित्र सन्निवेरस्तीति यवच्छेदा
र्थमवश्यं प्रयत्नः कर्त्तव्यः । ततश्च नेकार्थं च मिति दुर्बलः ॥ सिद्धांतः पूर्वपक्षनिराकरणमपि वचनसामर्थ्यकृतं । समाम्ना
यादेव हाबादीनां निधनं च सिद्धः । तस्मादेवं वर्णनीयं ॥ वृ । ष्टिकामपदेनैव संबंधे सति संशयः । फलेन साधनेने
64 तिवाक्यसामर्थ्यवीक्षणात् ॥ –अत्र हाबिति वृष्टिकामायेत्येवमेवावस्थिते नेयं दृष्टः । किं स्याद्वा फलेन हाबः सं
बंधोऽथ फलं जोदिते न साधनविशेषणेति । तदा यदा हाबिति निधनमित्यत्त फलं स्ते सवतीति वचनव्यक्तिरिव
ताभ्यां कारणाद्दर्शिता । वृ । ष्टिकामायेति मौनरविशेषणो । मौनरस्य स्वपदेन वाक्येनुपादानाद्ग्रहणारूपत्वेव
विशेषणत्वं नहाबस्य संबंध इति । फलस्वरूपासंबंधाविप्रायेण । तत्र तथैव विधिः पुनःश्रुत्यपेक्षं व्याख्याने
प्रयोगवचनसामर्थ्यादेव । सिद्धं स्यादित्यपराव्याख्या । यदि हि स्वार्थप्रवृत्तस्यैव मौनरस्य निधनमात्रे निय ६४
म्यते ततस्तत्प्रयोगवचनेनैवोपनीतमात्रहाबादिविधिसिद्धं विधानर्थक्यं नैव फलसंबंधे पुनः प्रयोगवचनं

समर्थ इत्यर्थवित्ता। किं यद्दृष्टेष्टिकामपदेनात्र श्रुत्यैका निहितः पुमान्। साधनापेक्षितत्वस्य सत्यादिपदस्येगतिः। अ
न्यथाऽनेनैव नरश्च करणावगतं दृष्टिसाधनत्वान्नियुक्तं ज्ञेयतानवतरा श्रयणं। किं चित्प्रयोजनमाक्षिप्त तथा श्रुतिल
क्षणा विशेषावगति श्रुवतो नोपकारस्याप्याप्त देवत्वात्स्थानमत्तिप्रेतमिति गम्यते। सिद्धान्तस्तु। यो नरस्य यमस्तस्य
यः कामोऽभिहितः पुरा। नियतं तु निधनं तस्य स एवायमनूद्यते। सर्वेऽप्यैव सो नरस्यायं कामसंयोगः पूर्वोक्त एव प्र
त्याभिज्ञायमानः संकीर्त्यते इतिनापूर्वफलप्रतिपत्तिः किमर्थं तु प्राप्तस्य पुनः श्रुतिरित्यत आह। निधनार्था पुनः श्रवत
श्रुतिरितिकस्मात्पुनः स्वत्वपानेन फलेनैव लाभादयो न शीघ्रमन्तो तदुच्यते। यथैवोरवतीयेन हृमा श्रयमाणुया व
ताफलेतथैव हापादिनिर्नाम्ना साश्रयमीप्सितं। हापा हृष्टि साधयेदिति गम्यमानोऽवश्यं किमाश्रित्य नेत्यपेक्षितेतत्र सौ
नरप्रकृतं तावन्नेशक्तोऽस्याश्रयत्वं प्रतिपत्तुमस्ति। हिंसामसौ नरश्चाष्टेनोच्यते। नयतः दोषाशक्तो साधयितुं। य
पादश्वा होमस्याहिंसकलं होमं कर्तुं नैशक्तो। तिनतु हापा सौ नरश्चाप्यतेन कृत्स्नस्याप्य चान्यतः ते दत्सा दत्त स्याश्रा
याश्रयि संबंधोवक्तव्यतो। यत्तु तेन काप्यसाधयितुं शक्यतेति धनं ननस्य प्रकरणमस्तीति न वाक्याद्धिनाऽत्राश्रय
त्वं प्रतिपद्यते तत्र यदि वाक्येनैव फलसंबन्धस्तेनैव वाश्रय जात स्थातो वाक्यं लभ्यते तात तथा निधनमात्रानुवादेन

होमादिसंबंधे प्रकरणाबाधिचा सर्वसाम्यसंबंधे प्रसंगे पुनः सोऽनरस्य यदि तिकथमपि विशेषणीयं तत्रापि पुनर्मतिः ले
ज्ञानीया। किं सायं घण्णव यव द्वारेऽनवे सोऽनरस्य क्षमा। तथापि न त्वनेक चाक्षुद्दोषिति न गम्यते। न तावदवयवे
न निधनेन सा। धितेन प्रकरणलभ्यं सोऽनरं साधितेन वत्यवयवस्य सोऽनरस्य चेनाप्रतीतेर्न चयथप्रान्तुया ग्रथाश्च
यदि त्यप्राकल्पनास्तीत्युक्तमुपेत्यापि चाचम्यय चामनिकप्रस्तावादिना के निसोऽनरे कतमस्यौ न कौ होमादयः श्व
युक्तं नामेति नैव ज्ञायेत। मुख्यो वा इश्वचोदनाल्लोकवदिति प्रश्नो विवाग्रामनुवंति। तत्र निधनमित्यनुवादो नावक
ल्पतोऽसंभोच्यते नायथ्यो क्षुद्रादीनां फलायचोदितानां प्रकरणाज्ज्ञातिश्चामसमाम्नातान्यसमस्तस्यापि चैनै
कावयवत्वे पि वसति वाक्यांतरवशेनांतेविनिवेशान्न च स्यैवमत्रापि फलविहितानां होमादीनामाम्नायचनमो
नरमुपसर्पतां समाम्नायवशेन लब्धस्थानानां निधनत्वमनुवदिष्यत इति तदयुक्तं। अनन्यविषयत्वेनस्था कौ: ३
नमुक्थ्यादिषु स्थितां होमादिस्थत्वव्युत्स्थानः कस्मादिति न गम्यते। युक्तमुक्थ्यादीनां प्रदेशांतरे घृहस्थरजो
विकचायक्रत्वं तन्निवेशित्वं न हि तेषां स्थानांतरं दृष्टं पूर्वं न चावि शातस्थानविशेषाणां रूपावधारणं फलसंबंधो
वानचान्यत्र प्रवर्तमानानां स्वरूपप्रयुक्तउक्थ्यादिप्रदेशासंनिवेशो। द्विवचनीतरणस्थानविशेषज्ञानः सोपि ६५
दृष्टप्रकृत्य चर्थं चायं विशानादेनयेवं फलचोदनया गृह्यत इति तदर्थत्वं न ज्ञायते। होमादीनां पुनरर्थः समाम्नायप्राप्तः स्वा

65

नविशेषसंबंधः स तावत्सौत्रविधानेन क्रत्वर्थत्वेन फलार्थत्वेन वोपयोजितः । इदानीं तु फलं प्रति स्वतंत्रं ज्ञहीष्यो विधानात्क्रोक
वत्साम्नां तु न स्थानतरप्रकृतवार्त्रघ्नीत्यादि विशेषेण ज्ञायते क्वाव तिष्ठतीत्यपेक्षिते प्रकृत एव विहित इति गम्यते ततस्तस्य क्रात
स्थानत्वान्न संदेहः स्यात् ॥ ननु चैकत्वाच्छब्दस्य य एवायं प्रकृतः स एव लोकादिष्वपीति तत्कृतत्वस्यापि तदेव स्थानं न वि
ध्यति । नैतदेवं । कुतः । एकत्वेपि हि शब्दस्य नानाभेदः प्रयोजने । तत्र कार्यांतरस्थानेन स्यात्कार्यांतरेष्वपि । न ह्येकेन
यत्कृतं विकार्ये स्थानं दृष्टसामर्थ्यं तदेवान्यत्रापीति निराकोवद्धा । न हि यद्देवदत्तस्य युध्यमानस्य स्थानमवगतं तदेव भुंजान
स्यापि भवतीति गम्यते । कार्यप्रयुक्तानि स्थानविशेषादयो न स्वरूपप्रयुक्ताः स्वरूपस्य स्थानांतरेप्यविनाशात् । अतः
कार्यान्यत्वादेकस्यापि स्थानभेदप्राप्तिः । न चैवं यज्ञे सौत्रयोगत्वं तस्य दोषः स्थानं तदेव पुरस्तात्पश्चादपीत्यवधारणे शक्यो
प्रासंगिकत्वे सौत्रसाधनत्वादिति चेन्न तत्रैव स्थानविशेषकर्तानाभागसिद्धत्वादितरेतराश्रयत्वं हि स्यात् । सो
मः साधनत्वेन स्थानविशेषकर्त्ता स्यात् सोमः साधनत्वमिति । ननु यथानुदिते होमं मध्यमादि तेषु ऊर्ध्वपादीयमान ता: ३
त्वेपि प्रकृतताग्रहणं तथा हीष्यादयो ग्रहीष्यंते । युक्तं तत्र प्रकृतगामित्वं विकृतिवाक्योपादित्तानां देवतासंबंध
वाख्यानात् । इह त्वयं चार्यछछन्दोपवर्ज्जमध्यमादिविभागस्य प्रकृतप्रत्यायनातिरेकादन्येषामयुक्तं । इह तु वंवो ९५
त्पादनात्तादृक्कारणमस्तीति न लौकिकप्रत्ययो निवर्तते । तस्मान्नेष्यता वैयार्थ्यं भजतीत्ययमपरः पक्षः सोपि
:स्था

यत्र सर्वप्रकारमन्विष्यमाणोपि प्रोतःफलसंबंधो न लभ्यते तदामाबाधितरां कृतिरिति प्रकृतसाधनालक्षणे विनायं
यैव फलं भवति प्रकृतायवृष्टिसाधनायहाभिज्ञप्रयोगमिति प्रकृतनाम्नी वृष्टिशब्दस्तत्साधनकृतसोमरमेव तेः
यतिनाप्यतो॥ नकान्यसाधनकृतमप्रतीतेः सत्यामपि हिरण्यादानां प्राप्तो। नियम चादृष्टविशेषकमिति सुकृतं तेः
नास्यायथान्ततः सोमरेणाद्विशास्तथा मृताएवनियमं तरतिविनापि निधनचाष्टसंयोगेनासिद्धवान्निधनं
न्यघतां तदेतदृशीयति। वृष्टिकामायसोमरमस्यैव त्यादि। तदेतदधिकरणं गुणक्रियाफलप्रतिपादनपरत्वादनन्
तराधिकरणयोरन्तयोरप्यवादान्ततंवृष्ट्यादिराष्टृ नैवं फलं साधनलक्षणोयमिति प्रतिपादयताप्यसूत्रवाक्यमे
दः को दित आद्यात्मानिधनमंबंधे सातिक्रस्तावासोमरविशेषणं चैनोपादीयमानेनवल्लन्विहतदुन्नयमप्यवि।
वृष्टिकामपदेनेव संबंधात प्रकरणजन्यचावृत्तो मर। विशेषणं चैत्यानवप्रकरणोलस्या विशेषावाक्यान्तरं
६६ तितस्मादृदोष्यः। इदं निहविचारयितव्यम्। किं यत्र कृतनशाखायामधीतस्य सोमस्यवृष्ट्यादिसाधनत्वं तत्पहीणास्ये ६६
नियम्यंते। उतयत्रहाम्निधनकैपव्यतेत छास्वागतं वृष्टिकामस्य प्रयोक्तव्यमेवमृद्धिं धनकेवेति संशयो विचारः।
तत्रानियमेन सहस्र सामशाखागतस्योमरविवेकेः प्रयोगे स तिवृष्टिकामादिनिमित्ते न दोषादिमात्रानि
यमइति प्राप्तेवक्तव्यं। यत्र तु तन्निधनकैपव्यतेतछा स्वागते वृष्टिकामादेः सम्यक्त्यागीति मृत्यादान व्यतिक्रमः।

उपपद्यते तस्य विनाशनीत्वेगीतिन्नेगीत्यंतरत्वात्क्रियोगमात्प्रतः समस्तोव विकल्प्यमानायथासमाम्नातार्थीनसे
नियम्याः॥ साम्नस्य ॥ हि समाम्नायाद्वगम्यते। तत्रा ये नाप्यन्यचेनात्रस्तोभिनानाद्रन्यद्वत्त्वति। तत्रय
दिशास्वान्तरी। साम्यांगीतौ। शास्वांतरीये निधनप्रयुज्येत। ततो तत्पान्यदैस्पाम्नायवचनाद् इतरेऽरावाधिकारः।
तत्छास्वागतगीतियस्तुलेनाविरोधोपपन्नेः सर्वत्र संभवाद्धिकाराश्रयणमस्तियात्रगति विकल्प
प्राप्तो वा यं नियमः समस्तस्य वसाम्नः परार्थत्वाद्विकल्पप्राप्ति नविषयत्वात्। अतो विनान्यदी
निधनविधानात् अतएकदेशनियमे सति कांस्यतो। उन्न्यायेन समस्तनियमः॥ एवोपि यात्रकं
कार्थः संभवत्सुतयोः सैवं धमात्रं विधीयते यद्यप्यदिकामायणो त्वरं यद्य हि॥ सिस्त्वेव निदानेन देव
६ त्र संपादनीय मिति तस्मात्समस्तानीति नियम इति सिद्धं॥ ॥ इति श्री नेदकुमारिलसंतोमीमां ६६
सावार्तिके द्वितीयस्याध्यायस्य द्वितीयः पादः॥ शुभमस्तु लेखकपाठकयोः॥ संवत् १९३८ माघशु
दि १ रवौ पं. श्री विश्वनाथस्तुनापंमहादेवेन स्वपाठार्थमलेखि॥

67

मीमांसावार्तिक तृतीयपादः

१३००